॥ শিৱস্তোত্র - স্ৱমি ৱিৱেকানন্দ ॥

নিখিলভুৱনজন্মস্থমভঙ্গপ্ররোহাঃ
অকলিতমহিমানঃ কল্পিতা যত্র তস্মিন্ .
সুৱিমলগগনাভে ঈশসংস্থেপ্যনীশে
মম ভৱতু ভৱেস্মিন্ ভাসুরো ভাৱবন্ধঃ ..
নিহতনিখিলমোহেধীশতা যত্র রূঢা
প্রকটিতপরপ্রেম্না যো মহাদেৱ সংজ্ঞঃ .
অশিথিলপরিৰুঙ্গঃ প্রেমরূপস্য যস্য
প্রণযতি হৃদি ৱিশ্ৱং ৱযাজমাত্রং ৱিভুত্ৱম্ ..
ৱহতি ৱিপুলৱাতঃ পূরৱ সংস্কাররূপঃ
প্রমথতি বলৱৃংদং ঘূরিণতেৱোরিমমালা .
প্রচলতি খলু যুগ্মং যুষ্মদস্মত্প্রতীতম্
অতিৱিকলিতরূপং নৌমি চিত্তং শিৱস্থম্ ..
জনকজনিতভাৱো ৱৃত্তযঃ সংস্কৃতাশ্চ
অগণনবহুরূপা যত্র একো যথারথঃ .
শমিতৱিকৃতৱাতে যত্র নাংতরবহিশ্চ
তমহহ হরমৌডে চিত্তৱৃত্তেরিনরোধম্ ..
গলিততিমিরমালঃ শুভ্রতেজঃপ্রকাশঃ
ধৱলকমলশোভঃ জ্ঞানপুঞ্জাট্টহাসঃ .
যমিজনহৃদিগম্যঃ নিষ্কলং ধ্যাযমানঃ
প্রণতমৱতু মং সঃ মানসো রাজহংসঃ ..
দুরিতদলনদক্ষং দক্ষজাদত্তদোষম্
কলিতকলিকলঙকং কম্রকল্হারকাংতম্ .
পরহিতকরণায প্রাণৱিচ্ছেদসূত্কম্
নতনযননিযুক্তং নীলকংঠং নমামঃ ..

স্ৱামী ৱিৱেকানন্দ

Please send corrections to Sunder Hattangadi (gourish@internet1.net)